श्री गणानायकाष्टकं

श्री गणानायकाष्टकं

एकदंतं महाकायं तप्तकांचनसन्निभं |
लंबोदरं विशालाक्षं वंदेऽहं गणनायकं ||1||

मौंजीकृष्णाजिनधरं नागयज्ञोपवीतिनं |
बालेंदुसुकलामौळिं वंदेऽहं गणनायकं ||2||

अंबिकाहृदयानंदं मातृभिःपरिवेष्टितं |
भक्तप्रियं मदोन्मत्तं वंदेऽहं गणनायकं ||3||

चित्ररत्नविचित्रांगं चित्रमालाविभूषितं |
चित्ररूपधरं देवं वंदेऽहं गणनायकं ||4||

गजवक्त्रं सुरश्रेष्ठं कर्णचामरभूषितं |
पाशांकुशधरं देवं वंदेऽहं गणनायकं ||5||

मूषकोत्तममारुह्य देवासुरमहाहवे |
योद्धुकामं महावीर्यं वंदेऽहं गणनायकं ||6||

यक्षकिन्नरगंधर्वसिद्धविद्याधरैः सदा |
स्तूयमानं महाबाहुं वंदेऽहं गणनायकं ||7||

सर्वविघ्नहरं देवं सर्वविघ्नविवर्जितं |
सर्वसिद्धिप्रदातारं वंदेऽहं गणनायकं ||8||

गणाष्टकमिदं पुण्यं यः पठेत्सततं नरः |
सिद्ध्यंति सर्वकार्याणि विद्यावान् धनवान् भवेत् ||9||

इति श्री गणानायकाष्टकं संपूर्णं |